International Journal of Sanskrit Research 2020; 6(6): 12-13

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(6): 12-13
© 2020 IJSR
www.anantaajournal.com
Received: 23-08-2020
Accepted: 15-10-2020

**डॉ० लीला बिहारी चौधरी**
पूर्व व्याकरण व्याख्याता, लगमा (रामभद्रपुर), लोहनारोड, दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ० लीला बिहारी चौधरी**
पूर्व व्याकरण व्याख्याता, लगमा (रामभद्रपुर), लोहनारोड, दरभंगा, बिहार, भारत

# षेत्रु व्याकरणम्

**डॉ० लीला बिहारी चौधरी**

**सारांशः**
''न हि सर्वे सर्वं जानन्ति'' इति सुप्रसिद्ध लोकोक्त्या सर्वविदितमेव तत्र भवतां भवतां सर्वेषां विद्वत्प्रवराणां अद्यतन पर्यन्तं निबन्धाऽनुबन्धप्रबन्धनेन प्रत्यक्षत्वं श्रुतं पठितंच, किन्तु अन्वेषणात्मकदृष्टिपथे इदं मन्मतं गागरे सागर अथवा जलबिन्दु निपातेन क्रमशः पूरयतेघटः इति सुसिद्धान्तत्वेन व्याकरणशास्त्रस्य मुखात्मकविवेचनावसरे मदीयाबुद्धिश्चिंतनशक्तिरूदभाविता सञ्जाता!
वस्तुतस्तु इमेवेदाः सखण्डाखण्ड सनातन धर्मोपधारकाः स्वयमेव सम्पूर्णाः सन्ति, किन्तु पदार्थविस्फोरणे तत्तच्छास्त्राणां यथा यथा स्थानं स्वयमेव वेदाः निधारितवन्त तथापि तदीय पृथक्त्वे शीर्षकमिदं बीजम्।

**प्रस्तावना**
सकल सनातन धर्मोपयोगिनो वेदग्रन्थाः जाज्वल्यमानं स्थानं जोधुष्यन्ते। नात्र काचनविप्रतिपतिस्तथापि पदार्थचिन्वर्थे साङ्गवेदानां साङ्गप्रयोजनं दृष्टिपथेन श्लोकोऽयं व्यवहर्यते।

> छन्दः पादौतु वेदस्य हस्तौ कल्पोऽथ पठ्यते।[1]
> ज्योतिषामयनश्चक्षुर्निरुक्तं श्रोत्रमुच्यते।।
> शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
> तस्मात्साङ्गमधीत्येव ब्रह्मलोकेमहीयते।।
> शिक्षा कल्पो व्याकरणं, निरूवतं छन्दसां चयः।[2]
> ज्योतिषामयनं चैव वेदाङगानि षडेव तु।।

उक्त व्यवहर्यमान–श्लोक–प्रमाण्येनेदं निर्णेतुं शक्यते यच्छलोकोऽययं आवारपारी–वेदस्य सम्पूर्णत्वेन साङ्गन्नितातन्मनिवार्य्यं दृष्ट्वा लोके यथा कस्य विद्वयक्तेसाङगो–पाङ्गे शरीरे यथा सर्वेन्दियाणि सप्रयोजनत्वेन संगृहीतानि व्यवहर्यन्ते च तथैव इमे वेदारपि न स्वायत्वमर्थाच्च षडगंरहितो–वेद सम्पूर्णत्वामिति भावः।

**1. शिक्षाः**
शिक्षा–ग्रन्था वर्णोच्चारणविधिं विशेषतो वर्णयन्ति। कथं वर्णा उच्चारणीयाः किं तेषां स्थानम् तत्र यत्नः कण्ठताल्वादीनां उच्चारणे किं महत्वम् कति वर्णाः कथं कायमारूतो वर्णत्वेन विपरिणमते, कति स्थानानि, कति स्वराः, कथं च ते प्रयोज्य इत्यादयो विषयाः शिक्षाग्रन्थेषु विविच्यन्ते। सायणेन ऋग्वेदभाष्यभूमिकायां शिक्षालक्षणम् उच्यते ''यत् स्वरवर्णाद्युच्चारण प्रकारो यत्र शिक्ष्यते सा शिक्षा''। तैत्तरीयोपनिषदि शिक्षायाः स्वरूपं निरूप्यते यच्छिक्षा................ वेदाङ्गानि षडेव तु।।

**2. व्याकरणम्**– ''व्याक्रियन्ते निष्पाद्यन्ते शब्दा अनेनेति व्याकरणम्''। एतदर्थमेव संस्कृतव्याकरणस्य ज्ञानिरभूत। संस्कृतव्याकरणावबोधाय महर्षेः पाणिनेः अष्टाध्यायी प्राधान्यं भजते। लौकिकसंस्कृतेन सहैव वैदिक संस्कृतस्यापि व्याकरणं तत्र प्रस्तूयते। अन्ये प्राचीना व्याकरणग्रन्था लुप्तप्राया एव। पाणिनीयसूत्रेषु कात्यायनेन वार्तिकाः पतञ्जलिना च महाभाष्यं विरचितम् पाणिनीय–कात्यायनपतञ्जलिः इति त्रयं मुनित्रयम् इत्यभिधीयते। व्याकरणे प्रकृति प्रत्ययस्य विचारः उदात्तादिस्वरविचारः उदात्तादिस्वरसंचारनियमाः सन्धिनियमाः शब्दरूप–धातु रूपादि निर्माण नियमाः प्रकृतेः प्रत्ययस्य च स्वरूपावधारणं तदर्थनिर्धारणं चेति विविधा विषयाः विविच्यन्ते। वेदेषु प्रकृति–प्रत्यय–विचारस्य स्वरस्य च यन्महत्त्व मिति तत्र व्याकरणमेव साहाय्ययम्। तदुक्तम्–पातञ्जले महाभाष्ये श्रीमता भगवता पतञ्जलिनाः–

ब्राह्मणेन[3] निष्कारणो धर्मः षडंगोवेदो ध्येयोज्ञेयश्च षडंगेषु व्याकरणम् प्रधानम् प्रधाने च कृतो यत्नः फलवान भवति इति।

यद्यपि बहुनाधीषे तथाऽपि पठपुत्रव्याकरणम्।
स्वजनरश्वजनोमाभूत् सकलं शकलं सकृच्छकृत।।

इति व्याकरणशास्त्रीयवचनमिप्रामाण्येन व्याकरणशास्त्रस्य महत्वं निर्वक्ति। तच्च–पदार्थविस्फोरणे चेदं व्याकरणशास्त्रमेव प्रमुखं स्थानं भजते, यतो हि अधीतानि अनेकानि शास्त्रानि तथाऽपि व्याकरणध्ययनमेव प्राथमिकम्। अन्यथा– सर्वं विफलमेव। वस्तुतस्तु व्याकरणशास्त्रमेव एतादृशं विशिष्टं शास्त्रं विद्यते, यस्य ज्ञानोत्तरमेवान्यज्ज्ञानं सम्भवति। एवमन्यज्ज्ञानन्नहि अपितु अधिकारिरपि तदुत्तरमेव, यतोहि श्रीमता भास्कराचार्येणाऽपि एतन्मतं बहुसम्यक् रूपेणोत्तरितम्। तदाह–

योवेद[4] वेद वदनं सदनं हि सम्यक्,
ब्राह्मयाः सवेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथमेतदधीत्य विद्वान्,
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।

इति भास्कराचार्यप्रभृत्याचार्य्यमुखोद्गीतपथा व्याकरणशास्त्रस्याऽध्ययन्नित– रामपेक्षितम्। अतोऽत्र प्रयोजनपल्लवेनालम्, किन्तु तत्सच्छास्त्रज्ञानं केन लघुनोपायेनस्यादित्यर्थमनेके आचार्या प्रायतन्त।
वस्तुतस्तु– व्याकरणशास्त्रस्य महत्त्वं किदयिति श्रीमता भगवता पतञ्लिना सविस्तरं प्रतिपादितम्। तच्च अथ शब्दानुशासनम्। अस्याऽयं भावः। वेदस्य साङगोपाङ्गरक्षार्थं व्याकरणशास्त्रमेवशरण्यम् यतोहि शब्दानुशासनमर्थात्– व्याकरणानुशासनमिति फलितार्थः तदुक्तं भगव्दिभः मुख्यप्रयोजने प्रयोजनान्तरे च। तत्र हि रक्षादिमुख्यप्रयोजने वैयाकरणा एव अर्हाः भवन्ति। एवञ्च प्रयोजनान्तरेऽपि ते एव प्रत्यक्षपरोक्षं ज्ञातुं समर्थाः भवन्ति।
एवमेव श्रीमताभर्तृहरिणाऽपि व्याकरणशास्त्रस्यानिवार्यत्वमङगीकत्य इत्थं प्रकारेण निरूक्तम्। तच्च ब्रह्मलोकप्राप्तौ वेदज्ञानमनिवार्य्यम, किन्तु अङगहवेदज्ञाने अङगज्ञानं विना कथमपि न संभवति। अतोत्र पूर्वमङगज्ञानमावश्यकतामनुनिशम्य "ब्रह्मणेन निष्कारणोधर्मः षऽङगोवेदोध्येयोज्ञेयश्च, षऽङगेषु प्रधानं व्याकरण। प्रधाने च कृतो यत्नः फलवान भवति।

**3. निरूक्तम्– निश्शेषेणोक्तन्निरूक्तम्।**

निरूक्ते क्लिष्टवैदिकशब्दानां निर्वचनं प्राप्यते। विषयेऽस्मिन् यास्कप्रणीतं निरूक्तमेव प्रमुखो ग्रन्थः। अत्र मन्त्राणां निर्वचनमूलाया व्याख्याः प्रथमः प्रयासः समासाद्यते। वैदिकशब्दानां संग्रहात्मको ग्रन्था निघण्टुरिति कथ्यते। तस्यैव व्याख्यानभूतं निरूक्तमेतत्। यास्को निरूक्ते स्वपूर्ववर्तिनः सप्तदशनिरूक्तकारान् परिगणयति। निरूक्ते काण्डत्रयं नैघण्टुकाण्ड नैगमकाण्डं दैवतकाण्डं चेति। निरूक्तस्य पंविधकार्यत्वम् उक्तं चः–[6] वर्णागमो वर्णविपर्ययचश्च द्वौ चापरौ वर्णविकारानाशौ। धातोस्तदर्थातिशयेनयोगः तदुच्यते पंचविधं निरूक्तम्।।

**4. कल्पः**– कल्पसूत्रेषु विविधाध्वराणां संस्कारादीनां च वर्णनं प्राप्यते। मन्त्राणां विविध कर्मसु विनियोगश्च तत्र प्रतिपाद्यते। कल्पसूत्राणि[7] चतुर्धा विभज्यन्तेः–

(क) श्रौत्रसूत्रम् (ख) गृह्यसूत्रम्,
(ग) धर्मसूत्रम् (घ) शुल्वसूत्रं च,

**5. ज्योतिषम्**–

भारतीय चिन्तनपम्परायां खस्थानां विविध ज्योतिः पिण्डानां बोधकम्। तेषां प्रभावात् प्राणीनामुपरि शुभाशुथफलज्ञापकं शास्त्रं ज्योतिषमुच्यते। वस्तुतः शास्त्राणां नक्षत्रादयः तान् अधिकृत्य कृतं शास्त्रं ज्योतिषम्। ज्योतिस् शब्दात् 'शेषे' इति सूत्रेण अणि, 'यस्येति चेति' अकार लोपे आदि वृद्धौ विभक्ति–कार्ये ज्योतिषम्। ज्योतिषां सूर्यादिग्रह–नक्षत्रादीनां ज्ञानकारकं शास्त्रं ज्योतिषम्।
प्रस्तुतं शास्त्रं भगवतो वेदस्य साङ्गत्वं भजते। नात्र काचनविप्रतिपत्रिः किन्तु सांगत्वेपि भगवतो वेदस्य नेत्रं प्रचक्षते दृश्यतां तावल्लोके "नयन विनु पन्थभारी" अत्र तथा लोके चक्षुः विहाय असहाय इत्युच्यते तथैव अचक्षुसत्वे ज्ञानत्वाभावः। अतोऽत्र शास्त्रमिदं सर्वाङ्गत्वे स्वकीयोच्चस्थानं भजते। अतोत्र शास्त्रस्याङ्गत्वेन नेत्रस्थानं निर्धारितम्।

**6. छन्दः**–

वेदेषु मन्त्राः प्रायश्छन्दोबद्धा अतएव वेदज्ञानाय छन्दः शास्त्रम् अनिवार्यम्। छन्दः शास्त्रविषयको मुख्यो ग्रन्थ पिंगलप्रणीत छन्दः सूत्रमेवोपलभ्यते। प्रातिशाख्यग्रन्थेषु वृत्तविचारः प्राप्यते। एभ्य एवं लौकिकछन्दोविषयकानां ग्रन्थानां विकासः समजनि।

**निष्कर्षः**

भगवतोवेदस्य साकाररूपे सर्वात्रनि अनिवार्यरूपेण संगृहीतानि। तेषु व्याकरणशास्त्रमुखस्थानीरूपत्वेन पद–पदार्थ विश्लेषणे स्वकीय अत्युत्कृष्टस्थानं भजते। नात्र काचन विप्रतिपतिः। विना व्याकरणं किमपि विचारकार्यं सर्वथा निरर्थकत्वमायाति।

**संदर्भ ग्रन्थाः**

1. पाणिनीय शिक्षा
2. तैत्तिरीयोपनिषद
3. व्याकरणशास्त्रस्येतिहासः
4. भास्कराचार्य्यप्रणीतम्।
5. महाभाष्यम्
6. निरूक्तम्
7. संस्कृत निबन्धशतकम्।